मासिकी

ISSN 2278-0416

# हरिप्रभा

वर्षम् : १२, अङ्कः : ८-९, अगस्त-सितम्बर २०१५

अन्ताराष्ट्रिया मूल्याङ्किता मासिकी शोधपत्रिका

An International Refereed Monthly Research Journal



हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व।
अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य॥
(ऋक्० १०/११२/३)

हरियाणा संस्कृत अकादमी, पंचकूला

# अनुक्रमणिका


| | | पृष्ठसंख्या |
|---|---|---|
| सम्पादकीयम् | | ४ |
| वैदिकराष्ट्रगानम् | | ६ |
| साहित्यविद्यायाः वेदमूलकत्वं साहित्य-शास्त्रस्य वेदोपजीवकत्वञ्च | डॉ. सुमनकुमारझाः | ७ |
| पाणिनीयसूत्रेषु छान्दसविधीनां विवेकः | श्रीमन्तचटर्जी | २० |
| परिभाषासूत्रदृशा पाणिनिभोजदेवयोः सूत्रपाठः | कु. विदुषा | २५ |
| पाणिनीयधातुपाठे धात्वर्थनिर्देश उपलक्षणमात्रम् | डॉ. देवदत्त सरोदे | ३२ |
| स्थानिवद्भावविमर्शः | श्री अनिलकुमार आर्यः | ३८ |
| कालाध्वनोरत्यन्तसंयोगे | डॉ. रमेश झाः | ४९ |
| भासकालिदासयोः रूपकेषु पाणिनीयशब्दकर्मधातूनां-प्रयोगविमार्शः | श्री रोहितः | ५१ |
| वैदिकसंस्कृतौ स्त्रीणां महत्त्वम् | डॉ. प्रयागनारायणमिश्रः | ५९ |
| स्त्रीणां स्वातन्त्र्यविषये मनोराशयः | मंजुनाथः एस.जी. | ६३ |
| मानवजीवने षोडशसंस्काराणां महत्त्वम् | श्री गौतम कुमारः | ६८ |
| ऋणम् अविभाज्यसम्पदा च | डॉ. वेदप्रकाश उपाध्यायः | ८१ |
| रक्षार्थं वेदानामध्ययेयं व्याकरणम् | श्री मोहित कुमारः | ९४ |
| पुराणानां विज्ञानोपयोगित्वम् | कु. मुनेश देवी | १०१ |
| उपमानप्रमाणविषयकतार्किकाद्वैतवेदान्तिमतविमर्शः | श्री परमेश तिवारी | १०५ |
| शिक्षा वेदाङ्गलक्षणं शिक्षाग्रन्थेषु | डॉ. भूषणलालः शर्मा | ११० |

मासिकी शोध-पत्रिका
ISSN 2278-0416

# हरिप्रभा

वर्षम्-१२, अङ्कः-८-९, २०१५

प्रधान-संरक्षकः अध्यक्षश्च
श्री मनोहरलालः
मुख्यमन्त्री, हरियाणा

प्रधानसम्पादकः
श्री राजेशकुमारः खुल्लरः, आई.ए.एस.
कार्यकारी उपाध्यक्षः, अकादमी

प्रबन्धसम्पादकः
डॉ. अभिलक्ष लिखी, आई.ए.एस.
महानिदेशकः,
सूचना-जनसम्पर्क एवं सांस्कृतिक-कार्यविभागः, अकादमी

मुख्यसम्पादकः
डॉ0 सुधीरकुमारः
निदेशकः, हरियाणा संस्कृत अकादमी

सम्पादकः
विकासः शास्त्री

उपसम्पादिका
डॉ.प्रतिभा वर्मा

प्रत्यङ्कं मूल्यम्- दशरुप्यकाणि
वार्षिकशुल्कम्- विंशत्युत्तरशतं रुप्यकाणि

सम्पर्कः
हरियाणा संस्कृत अकादमी
अकादमी भवनम्, पी-16, सैक्टर-14,पञ्चकूला (हरियाणा)
दूरभाषम्-0172-2570979
अणुसङ्केतः-hariprabhaskt@gmail.com

# परिभाषासूत्रदृशा पाणिनिभोजदेवयोः सूत्रपाठः

कु. विदुषा

**वैयाकरणाः हि प्रथमे विद्वांसः व्याकरणमूलत्वात्सर्वविद्यानाम्** इत्यभियुक्तोक्त्या व्याकरणं सर्वाः विद्याः अतिशेते। ऐन्द्रव्याकरणादारभ्य काले-काले महान्तैः वैयाकरणैः स्वीयं वैयाकरणवैदुष्यं विविधानां ग्रन्थानां स्वरूपेऽस्माकं पुरतः उपस्थापितम्। अस्यां धारायाम् आचार्यस्य पाणिनेः समादरणीयं स्थानमस्ति। कालान्तरे धाराधीश्वरो महाराजो भोजदेवो मुख्यतः पाणिनिव्याकरणमाश्रित्य कातन्त्र-चान्द्र-प्रभृतीन् वैयाकरणान् यथेष्टमुपयुज्य नवीनं *सरस्वतीकण्ठाभरणम्* नाम व्याकरणं प्रणिनाय। ग्रन्थस्यास्येदमस्ति वैशिष्ट्यं यत् गणपाठः, परिभाषापाठः, उणादिपाठः, फिट्सूत्राणि, चेत्येते विषयाः सूत्रपाठ एव एकत्रोपात्ताः विद्यन्ते। पत्रेऽस्मिन् पाणिनिभोजदेवयोः परिभाषासूत्राणां तुलनात्मिका स्थितिः विवेच्यते।

**परिभाषासूत्राणां स्वरूपं महत्त्वञ्च:**

सूत्राणां द्वितीयः प्रकारः परिभाषासूत्रमस्ति। **परि** उपसर्गपूर्वकात् **भाष्** धातोः **अच्** **टाप्** च प्रत्ययौ भूत्वा निष्पन्नोऽयं शब्दो वर्तते। स्वामिना दयानन्देन परिभाषायाः लक्षणमेवं कृतम्-

> **एकदेशस्थिता शास्त्रभवने याति दीपताम्।**
> **परितो व्यापृतां भाषां परिभाषां प्रचक्षते॥**[१]

माघानुसारेण-

> **परितः प्रमिताक्षरापि सर्वं विषयं प्राप्तवती गता प्रतिष्ठाम्।**
> **न खलु प्रतिहन्यते कदाचित् परिभाषेव गरीयसी यदाज्ञा॥**[२]

काशिकायाम् **इको गुणवृद्धी** इति सूत्रव्याख्याप्रसङ्गे लिखितं वर्तते- **परिभाषेयं स्थानिनियमार्था। अनियमप्रसङ्गे नियमो विधीयते।**[३]

परिभाषासूत्राणि विधिसूत्राणां प्रयोगनियामकानि भवन्ति। वस्तुतः परिभाषा विधिशास्त्रस्य प्रवृत्तिं साधुत्वस्य दिशायामुन्मुखीकरोति। आचार्यो हरदत्तः परिभाषायाः परिभाषामेवं प्रस्तौति- **परितः सर्वत्र पूर्वत्र परत्र व्यवहिते नान्तरे च भाष्यते कार्यमनया सा परिभाषा।**[४]

संज्ञाविध्यादिसूत्राणां प्रवृत्तौ अव्याप्त्यतिव्याप्त्यसंभवादीनां दोषाणां परिहारः परिभाषायाः लक्ष्यं वर्तते। परिभाषायाः मुख्यतस्त्रिप्रकाराः भवन्तिः-

१. **ज्ञापकसिद्धाः** - सूत्रवचनेन साक्षादकथयित्वा प्रकारान्तरेण इङ्गितेन चेष्टितेन ज्ञापिताः परिभाषा